सुवर्णसिद्धिराह–'कथमेतत् ?'। सोऽब्रवीत्,—

SEC-I (SEC.- E)

## १४. पान्थब्राह्मणकर्कटकथा

कस्मिंश्चिदधिष्ठाने ब्रह्मदत्तनामा ब्राह्मणः प्रतिवसति स्म। स च प्रयोजनवशाद्ग्रामं प्रस्थितः स्वमात्राऽभिहितोयत्–'वत्स !, कथमेकाकी व्रजसि ?। तदन्विष्यतां कश्चिद् द्वितीयः सहायः।'

स आह–'अम्ब ! मा भैषीः, निरुपद्रवोऽयं मार्गः, कार्यवशादेकाकी गमिष्यामि।' अथ तस्य तं निश्चयं ज्ञात्वा समीपस्थवाप्याः सकाशात्कर्कटमादाय मात्राऽभिहित –'वत्स ! अवश्यं यदि गन्तव्यं तदेष कर्कटोऽपि सहायो भवतु। तदेनं गृहीत्वा गच्छ।

सोऽपि मातुर्वचनादुभाभ्यां पाणिभ्यां तं संगृह्य कर्पूरपुटिका मध्ये निधाय, पात्रमध्ये संस्थाप्य, शीघ्रं प्रस्थितः।

अथ गच्छन्ग्रीष्मोष्मणा सन्तप्तः कञ्चिन्मार्गस्थवृक्षमासाद्य तत्रैव प्रसुप्तः। अत्रान्तरे वृक्षकोटरान्निर्गत्य सर्पस्तत्समीपमागतः।

स च कर्पूरसुगन्धसहजप्रियत्वात्तं परित्यज्य वस्त्रं विदार्याभ्यन्तरगतां कर्पूरपुटिकामतिलौल्यादभक्षयत्। सोऽपि कर्कटस्तत्रैव स्थितः सन् सर्पप्राणानपाहरत्। ब्राह्मणोऽपि यावत्प्रबुद्धः पश्यति तावत्समीपे मृतः कृष्णसर्पो निजपार्श्वे कर्पूरपुटिकोपरि स्थितस्तिष्ठति। तं दृष्ट्वा व्यचिन्तयत्–'कर्कटेनाऽयं हतः' इति।

---

प्राणा. ॥ ८८ ॥ अधिष्ठाने=नगरे। प्रयोजनवशात्-आवश्यककार्यप्रसङ्गात्। प्रस्थितः=चलित। अन्विष्यताम्=अन्विष्य सहैव नीयताम्। द्वितीय=अपर सहाय। समीपस्थवाप्या=निकटवर्त्तिवापीत। मात्रा=जनन्या। कर्कट=कुलीरः। सहायः=द्वितीय. सहचर। तं=कर्कटम्। पुटिका=अल्प सम्पुट (डिब्बी)।

ग्रीष्मोष्मणा=ग्रीष्मर्तुघर्मेण। आसाद्य=लब्ध्वा। वृक्षकोटरात्=वृक्षकुक्षिकुहरात्। स.=सर्प.। कर्पूरसुगन्ध. सहज प्रियो यस्य तस्य भावस्तत्त्वं, तस्मात्=कर्पूरसुगन्धनिसर्गप्रियतया। त==पान्थ ब्रह्मदत्तम्।

अभ्यन्तरगतां=मध्यस्थिताम्। अतिलौल्यात्=अत्यौकण्ठ्यात्। तत्रैव=

प्रसन्नो भूत्वाऽब्रवीच्च-'भोः ! सत्यमभिहितं मम मात्रा, यत्पुरुषेण कोऽपि सहाय. कार्यः, नैकाकिना गन्तव्यम्, यतो मया श्रद्धापूरितचेतसा तद्वचनमनुष्ठितम्, तेनाहं कर्कटेन सर्पव्यापादनाद्रक्षितः। अथवा साध्विदमुच्यते—

'क्षीणः श्रयति शशी रविमृद्धो वर्धयति पाथसां नाथम्।
अन्ये विपदि सहाया धनिनां श्रियमनुभवन्त्यन्ये ॥ ८९ ॥

मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी' ॥ ९० ॥

एवमुक्त्वाऽसौ ब्राह्मणो यथाभिप्रेतं गतः। अतोऽहं ब्रवीमि 'अपि कापुरुषो मार्गे' इति। ❀

---

कर्पूरपुटिकायाम्। प्रबुद्ध =सुप्तोत्थित। कोऽपि=कश्चिदपि। श्रद्धया पूरितम्-समन्वितं चेतो यस्यासौ तेन श्रद्धापूरितचेतसा=श्रद्धालुना। सर्पव्यापादनात्=सर्पमारणात्।

क्षीण.=अमावास्याया नष्टकलो भूत्वा। शशी=चन्द्र। रवि श्रयति=सूर्यमाश्रयते। परन्तु-ऋद्ध =पूर्णकलो यदा भवति ( पूर्णिमाया )-तदा। पाथसाम्-जलानाम्। नाथ=समुद्रम्। वर्द्धयति=प्रवर्द्धयति, हर्षयति-न रविम्, इत्यहो! कृतघ्नता चन्द्रस्य। तदाह-अन्य इति। धनिना विपदि सहाया. खलु अन्ये भवन्ति, परन्तु-समृद्धिकाले श्रियमन्येऽनुभवन्ति। समृद्धिसमये ये सन्निहितास्ते न विपदि सहायता कुर्वन्ति। ये च खलु विपदि सहायास्ते धनिभि स्वसमृद्धौ न स्मर्यन्ते। एवञ्च विपदि सहायभूतो जन सर्वथा स्मरणीयो रक्षणीयश्चेत्याशय. ॥ ८९ ॥ मन्त्रे=तान्त्रिके वैदिके वा मन्त्रे। तीर्थे=गङ्गादितीर्थे। द्विजे=ब्राह्मणे। दैवज्ञे=मौहूर्त्तिके। भेषजे=औषधे। यस्य पुंस यादृशी भावना=विश्वास, तस्य खलु तादृशी=तथैव सिद्धिर्भवति। देवद्विजगुर्वादीन् देवादिबुद्ध्या आस्तिक्येन विश्वसन् सिद्धिमृच्छति। अतो गुर्वादीनां वचनं सर्वदा पालनीयं, तद्वचसि च दृढो विश्वासो हि फलदायको भवतीत्यर्थ ॥ ९० ॥

---

१ 'स्नरति'। २ 'रविवृद्धो'।